# पूर्वत्रासिद्धम्

**Dr. G.S.V. Dattatreya Murthy**
Assistant professor in Vyakarana
Department of Sanskrit & IC,
SCSVMV (Deemed to be ) Univeresity
Enathur, Kanchipuram - 631561

**प्रधानांशाः**

सूत्रविचारः

सूत्रप्रयोजनानि

अधिकारत्वावश्यकता

अधिकारप्रयोजनम्

परिभाषानिराकरणम्

कार्यासिद्धत्वक्षः

शास्त्रासिद्धत्वपक्षः

भगवता पाणिनिमहर्षिणा विरचितायाम् अष्टाध्याय्याम् अष्टमाध्यायस्य द्वितीयपादे प्रथमं सूत्रमिदम्। इतः पूर्वं विद्यमानसूत्रजालं **सपादसप्ताध्यायी**इति , इतः उत्तरं सूत्रजालं **त्रिपादी**इति च अत्र शास्त्रे व्यवह्रियते। पूर्वत्र, असिद्धम् इति पदविभागः। इदं पदद्वयं त्रिपाद्यामधिक्रियते। अतः सपादसप्ताध्यायीं प्रति त्रिपादी असिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात् इति सूत्रार्थः। राजभिः इत्यादौ नलोपस्यासिद्धत्वात् भिसः ऐसादेशाभावः, अमुष्मै इत्यादौ मुभावस्यासिद्धत्वात् ङेः स्मै, महान् इत्यादौ संयोगान्तलोपस्य असिद्धत्वात् नलोपाभावः इत्यादीनि अस्य सूत्रप्रयोजनानि।

अस्य अधिकारत्वाभावे त्रिपाद्यां पूर्वं प्रति परासिद्धत्वं न स्यात्। ननु स्थानिवत्वान्तवत्वरूपातिदेशारवदस्यापि त्रिपाध्यां प्रवृत्तिरिति न दोष इति चेन्न। तथा सति सपादसप्ताध्याय्यामपि पूर्वं प्रति परासिद्धत्वापत्तेः। न च मध्ये पाठकरणात् , विप्रतिषेधसूत्रारम्भाच्च सपादसप्ताध्याय्यां नास्य प्रवृत्तिरिति वाच्यम्। तथा सति विनिगमनाविरहेण त्रिपाद्यां पूर्वं प्रति परासिद्धत्वाभावकल्पनापत्तेः, सूत्रस्य सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धत्वसम्पादकत्वेन चारितार्थ्यात्। अतः अस्य अधिकारत्वम्वश्यकम्।

अधिकारत्वे प्रयेजनं तु **गोधुक्ष्मान्** इति। दादेर्धातोर्घः, एकाचो बशो भश् झषन्तस्य स्ध्वोः, झलां जशोन्ते , प्रत्यये भाषायां नित्यम् इत्येतेषु पूर्वं प्रति परस्यासिद्धत्वात् घत्वादीनाम् क्रमेण प्रवृत्या रूपसिद्धिः,

अन्यथा घत्वे, भष्भावात् परत्वात् नित्यत्वाच्च जश्त्वे रूपासिद्धेः। न च निरवकाशत्वात् जश्त्वं बाधित्वा भष्भावे अदोष इति वाच्यम्। तथा प्राप्तस्य भष्भावस्य परत्वान्नित्यत्वाच्च अनुनासिकत्वेन बाधात् रूपासिद्धिप्रसङ्गात्।

एतेन घत्वजश्त्वानुनासिकेषु भष्भावानापत्तिरिति प्रकृतग्रन्थस्य घत्वजश्त्वानुनासिकेषु कृतेषु भष्भावानापत्तिरित्यर्थः आहोस्वित् तेषु प्राप्तेषु इति वा, नाद्यः, अनुनासिके कृते भष्भावस्य सिद्धान्तेप्यनिष्टत्वात्। नान्त्यः, हकारस्य घत्वप्राप्तिवेलायां यरोभावेन अनुनासिकाप्राप्तेः तेषां युगपत् प्राप्त्यसंभवात् इत्युभयथाप्यसङ्गतिरित्यपास्तम्।

ननु भष्भावानापत्तिरिति न्यूनम्, उक्तरीत्या प्राप्तस्यानुनासिकस्य अपरनिमित्तकत्वेनअन्तरङ्गत्वात् जश्त्वं बाधकं स्यात्, तस्य भष्भावः, तस्यानुनासिकत्वमित्येवं चक्रकापत्या त्रयाणां मध्ये कस्याप्यप्रवृत्तेः इति चेत् अत्र केचित्-

भष्भावानापत्तिरित्यत्र भष्भावपदस्य जश्त्वानुनासिकयोः अपि उपलक्षकत्वेनादोषात् इति वदन्ति। अन्ये तु आपद्यमानेर्थे न्यायानादरात् त्रयाणां मध्ये यस्य कस्याप्यनापत्तिकथनेप्यदोषः इत्याहुः।

न च शेखरकृन्मते त्रिपाद्यामन्तरङ्गपरिभाषायाः अप्रवृत्या अनुनासिकापेक्षया जश्त्वस्य प्राबल्याभावेन चक्रकापत्तेरसत्वेन न्यूयतापादनमसङ्गतमेवेति वाच्यम्। इदानीं त्रिपाद्यां पूर्वं प्रति परासिद्धत्वाभावेन त्रिपादीस्थशास्त्रयोः अन्तरङ्गबहिरङ्गभावसत्वेन , प्रत्यक्षासिद्धत्वस्य आनुमानिक्या परिभाषया बाधाभावेन च अप्रवृत्तिबीजस्याभावात्, सपादसप्ताध्यायीं प्रति त्रिपाद्याः असिद्धत्वेपि कार्यकालपक्षाश्रयणेन परिभाषायास्तत्र प्रवृत्तेः उपपादयितुं शक्यत्वात्। इति चेत्-न।

गोदुह् मत् इति स्थिते प्राप्तं जश्त्वमपवादत्वात् घत्वं प्रबाध्य, ततः जश्त्वं बाधित्वा भष्भावप्राप्तावपि, यथा दण्डाग्रम् इत्यादौ समकालप्राप्तगुणबाधनेन चरितार्थस्य अपवादभूतसवर्णदीर्घस्य अचारितार्थ्यरूपबाधबीजाभावात् अयज इ इन्द्रम् इत्यादौ अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते इति न्यायेन अन्तरङ्गेण गुणेन बाधः, तद्वत् भुत् इत्यादौ स्वसमकालप्राप्त जश्त्वबाधनेन चरितार्थस्य भष्भावस्य पूर्वोपस्थितिनिमित्तकत्वेन अन्तरङ्गत्वात् जश्त्वेन बाधः। अनुनासिकत्वमपि अपरनिमित्तकत्वेन अन्तरङ्गत्वात् जश्त्वेन बाध्यत इति घकारस्य जश्त्वे अनुनासिकत्वे भष्भावानुपपत्तिरिति नागेशोक्तं सम्यगेव।

ननु यथोद्देशकार्यकालपक्षयोः लक्ष्यानुरोधात् व्यवस्थितत्वात् प्रकृते गोधुङ्मान् इत्यत्र भष्भावस्य इष्टत्वात् असिद्धपरिभाषया यथोद्देशत्वमेवाङ्गीक्रियते। तथा च त्रिपाद्यां तस्या अप्रवृत्या जश्त्वस्य भष्भावानुनासिकत्वाभ्यामन्तरङ्गत्वं वक्तुं न शक्यत इति जश्त्वापवादत्वात् भष्भावे जश्त्वे अनुनासिकत्वे

चेष्टसिद्धिः। न च परेण अनुनासिकेन भष्भावबाधः शङ्क्यः। विप्रतिषेधसूत्रेपि यथोद्देशपक्षाश्रयणात्। किञ्च दादेर्धातोर्घः इत्यनेन प्रक्रियालाघवाय गकारे विधातव्ये घकारविधानसामर्थ्येन तस्य भष्भावसम्पादनं विना प्रयोजनान्करासम्भवात् जश्त्वात् अनुनासिकाच्च पूर्वं भष्भावः प्रवर्तत इति नात्र दोषः इति चेत् सत्यम्। घत्वे प्रतिपदविधित्वेन झयः इति वत्वापत्तिरेवात्र दोषत्वात्। अत एव भाष्ये गोधुङ्भ्यान् इत्यत्र वत्वमेवापादितम्। सिद्धान्ते तु घत्वस्यासिद्धत्वात् झयन्तत्वाभावात् न वत्वम्।

केचित्तु अस्य अदिकारत्वाभावेपि न कश्चिद्दोषः, तथाहि अस्य परिभाषात्वमभ्युपगम्य कार्यकालपक्षमाश्रित्य त्रिपाद्यां प्रवृत्तौ बाधकाभावेन त्रिपाद्यां पूर्वं प्रति परासिद्धत्मपि सिध्यति।

अधिकारत्वे प्रतिसूत्रमावृत्तौ गौरवम्. न चास्य परिभाषात्वे सपादसप्ताध्याय्यामपि पूर्वं प्रति परस्यासिद्धत्वं स्यादिति वाच्यम्। मध्ये पाठकरणात्, विप्रतिषेधसूत्रारम्भाच्च सपादसप्ताध्याय्यामस्याः अप्रवृत्तेः। न च विनिगमनाविरहात् त्रिपाद्यामपि परासिद्धत्वाभावकल्पनापत्तिररति वाच्यम्। षट् श्चोतति इत्यत्र धुडभावार्थं क्रियमाणस्य **श्चुत्वं धुटि सिद्धं वाच्यम्** इति वार्तिकस्यैव त्रिपाद्यामेतत्प्रवृत्तौ मानत्वात्। अन्यथा धुटि कर्तव्ये श्चुत्वस्य सिद्धत्वेन तद्वैयर्थ्यं स्पष्टमेव इत्याहुः।

वस्तुतस्तु सपादसप्ताध्याय्यां पूर्वं प्रति परासिद्धत्वाभावे भाष्ये पाठकरणस्य, विप्रतिषेधसूत्रारम्भस्य, त्रिपाद्यां पूर्वं प्रति परासिद्धत्वे **श्चुत्वं धुटि सिद्धं वाच्यम्** इति वार्तिकारम्भस्य च सामर्थ्योपवर्णनापेक्षया अधिकारत्वपक्ष एव लघीयान् इति विभावनीयम्।

अत्र सूत्रे कार्यासिद्धत्वाङ्गीकारे मनोरथः इत्याद्यसिद्धिः। मनस् रथः इति स्थिते सस्य रुत्वे मनर् रथः इति जाते **हशि च** इत्युत्वस्य, **रोरि** इति रेफलोपस्य च प्राप्तौ परत्वाल्लोपे रोरभावेन उत्वं न स्यात्। कार्यासिद्धत्वपक्षे तु निरधिष्ठानारोपासम्भवात् कार्यस्य पूर्वं प्रवृत्तेः आवश्यकत्वात्।

अतः शास्त्रासिद्धत्वमङ्गीक्रियते। अत्र पक्षे उत्वदृष्ट्या **रोरि** इति शास्त्रस्यैवासिद्धत्वात् पूर्वमुत्वप्रवृत्तेरदोषः।

ननु लोपो नाम दर्शनाभावः, तस्यासिद्धत्वं नाम अभावारोपः। तथा च **रोरि** इति लोपस्यासिद्धत्वे दर्शनाभावाभावस्य दर्शनरूपत्वात् रोः सत्वात् उत्वं सुलभमिति चेत्, कार्यासिद्धत्वपक्षे **अमू, अमी** इत्याद्यसिद्धिरेव। अद अ औ इत्यत्र परत्वात् पूर्वं मुत्वे तस्यासिद्धत्वेपि स्थानिभूताकारस्याभावेन **अतो गुणे** इति पररूपं न स्यात्।

SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA KANCHEEPURAM SCSVMV

न च तत्र मुत्वस्यासिद्धत्वे तस्याव्यवधायकत्वेन अदश्सब्दाद्यकारमादायैव पररूपं निर्वहतीति वाच्यम्। पररूपनिष्पन्नसकारस्य मुत्वात् पूर्वं, परत्र वा निवेशनीयत्वेन इष्टरूपासिद्धितादवस्थ्यात्।

न च कार्यासिद्धत्वपक्षेपि **अचः परस्मिन् पूर्वविधौ** इति त्रैपादिकं शास्त्रं न प्रवृतम्, स्थानी न निवृत्तः इति सम्भावनायां यत्प्राप्तं तद्भवति, यन्न प्राप्तं तन्न भवतीति तात्पर्यार्थस्वीकारेण परत्वान्मुत्वे कृतेपि **मु** शब्दे **द** बुध्या पररूपे, सन्नियोगशिष्टन्यायेन मकारस्यापि निवृत्तौ, अद औ इति स्थिते लक्ष्ये लक्षण न्यायेन मुत्वाप्रवृत्तौ, वृद्धौ मुत्वे **अमू** इत्याद्यसिद्धिः, इदानीं लक्ष्ये लक्षणस्य इति न्यायस्य तु न प्रसङ्गः, तल्लक्ष्यत्वाभावात्।

अमूभ्यामित्याद्यसिध्यापत्तेः। अद भ्याम् इति स्थिते पूर्वं मुत्वे तस्यासिद्धत्वाद्दीर्घे स्वघटकमात्रोद्देश्यकविकारघटिततया तल्लक्ष्यत्वात् पुनर्मुत्वाप्रवृत्तिसम्भवात्।

वस्तुतस्तु सम्भावनाघटिततात्पर्यार्थकल्पने मानाभावः, फलाभावः, गौरवं च। किञ्च **अमू** इत्यादौ मुत्वे दकारबुध्या पररूपप्रवृत्तावपि मकारस्य निवृत्तिर्न सम्भवति। **ऐनेय** इत्यादाविव पूर्वस्य मकारस्य स्थितौ स्थानिवद्भावात्। तथा च अदश्शब्दसम्बन्धिदकाराभावेन मुत्वाप्रवृत्तौ **अमौ** इत्याद्यनिष्टरूपापत्तिरिति शास्त्रासिद्धत्वपक्ष एव युक्त एवेति सिद्धान्तः

SRI CHANDRASEKHARENDRA SARASWATHI VISWA MAHAVIDYALAYA
KANCHEEPURAM
SCSVMV